न० । "अचक्षुष्कमश्रोत्रममनोऽतेजस्कम्" शत० ब्रा० पूर्वार्थे औ अवाञ्चौ अत्र अवाचौ इत्यादिभेदः । कालाद्यर्थे प्रथमादीनां स्थानेऽस्ताति तस्य लुक् । ७अवरकालादावर्थे अव्य०। अञ्चतेर्गत्यर्थत्वे नलोपः पूजार्थत्वे तु न नलोपः । उच्यते प्रशस्यते वाक् स्तुतिः । ८तद्रहिते च "दुष्प्राव्योऽवहन्तेदवाचः" ऋ० ४,२५,६, अवाचःस्तुति रहिताः भा० भवादौ ख । अवाचीनस्तद्भवादौ त्रि० । तिसृभिर्भस्त्रावाचीनविला"ता०ब्रा०"अवाचीनविला अवाङ्मुखविला"भा०। दिगा०यत् ।अवाच्यस्तद्भवादौ त्रि० ।

**अवाच्य** न०वच-ण्यत् न कुत्वम् न०त० । १दुष्टवचने, "अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः" गीता २वचनानर्हे,निन्दनीये त्रि० ३अकथनीये च "अवाच्यो दीक्षितो नाम्ना यवीयानपि योभवेत्" मनुः अवाच्+भवार्थे यत् । ४अवरकालादौ भवे त्रि०। ५अभिधावृत्त्या बोधयितुमशक्ये च । "अवाच्यत्वादिकं तस्य वच्मि व्यञ्जनरूपणे" सा० द० । यमुद्दिश्य कथ्यते ६तद्भिन्ने च ।

**अवात** त्रि०नास्ति वातो यत्र। १वायुशून्यदेशे वा-क्त न०त०। २अन्यैरप्रतिगते च "वन्वन्नवातोऽस्तृतः"ऋ०६,१६,२० । वातव्यापारशोषणशून्ये "न स्तृष्यन्ते युवतयोऽवाताः" ऋ०६,६,७ "अवाताः वातस्य शोषणहेतुत्वात् तच्छून्यतया अशुष्काः" भा० ।

**अवाञ्चित** त्रि० अव+अनुच-णिच्-क्त । आनमिते "तृणवाञ्छया मुहुरवाञ्चितान्" माघः । [देशे त्रिका० ।

**अवाच्यदेश** पु० अवाचि भवः यत् कर्म० । स्त्रीणामधो-

**अवादिन्** त्रि०वद-णिनि न०त०स्त्रियां ङीप्। १अविरोधिनि २अवदनशीले च। [कादृष्टमेकमाम्रफलं किल"भा०स०प०

**अवान** त्रि० अव+अन-अच् । शुष्कफलादौ "अवानमशु-

**अवान्तर** त्रि०अवगतमन्तरं मध्यम् प्रा०स० । १प्रधानान्तपातिनि अङ्गादौ,२सामान्यस्य विशेषे ३प्रसङ्गागते च "इयं फलश्रुतिः निःश्रेयसपरमपुरुषार्थसाधनपरा भवति किन्तु बहिर्मुखानां मोक्षविवक्षयाऽवान्तर कर्मफलैः कर्मसु रुच्युत्पादनमात्रम्" श्रीधरः। यथा"पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान् । पित्रैवमुक्तः पिबति तिक्तमप्यतिबालकः"पुरा०।"तएतामवान्तरां दीक्षामपश्यन्"शत०ब्रा०।

**अवान्तरदिश्** स्त्री अवान्तरा द्वयोर्दिशोर्मध्ये दिक् । अन्तरालदिशि ऐशान्यादिदिशि कोणे । "दिशोः पार्श्वेऽवान्तरदिशः पर्शवः" वृ०उ०।

**अवान्तराम्** अव्य०अवान्तर+बा०आमु । सर्वमध्यपातिनि ।

"तदेतमवान्तरामात्मानमुपह्वयते" इति शत० ब्रा० ।

**अवापित** त्रि० वप-णिच्-क्त न०त० । यस्य वपनं न कृतं तादृशे आरोपिते १धान्यादौ २अच्छेदिते केशादौ च । अव+अप-णिच्-क्त-३प्रापिते च । "विषमां कुण्डलनामवापिता" नैष० ।

**अवाप्त** त्रि० अव+आप-क्त । प्राप्ते । "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चन" गीता । [मवाप्तव्यम्" गीता ।

**अवाप्तव्य** त्रि० अव+आप-तव्य । प्राप्तव्ये । "नानवाप्त-

**अवाप्ति** स्त्री अव+आप-क्तिन् । प्राप्तौ । "तपः किलेदं तदवाप्तिसाधनम्" कुमा० "इष्टानवाप्तेरौत्सुक्यम्" सा०द०।

**अवाप्य** त्रि० अव+आप ण्यत् । १प्राप्ये। "ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यञ्च" यद्धनम्" मनुः । न वाप्यः। २आरोप्ये ३अच्छेद्ये केशे च अव+आप-ल्यप् । ४प्राप्येत्यर्थे अव्य०।

**अवाम** न० । न०त० । वामभिन्ने १दक्षिणे "अवामे वामाङ्गे" नैष० । वामः प्रतिकूलः सुन्दरो वा विरोधे न०त० । २अनुकूले सुन्दरभिन्ने ३अशोभने च त्रि०।[ऋ०१०,४,२

**अवाय** पु० अव+इण् घञ् । अवयवे । "अनवायं किमीदिने"

**अवार** न०न वार्य्यते जलेन वृ-कर्म्मणि घञ् । नद्यादेरर्वाक् तीरे । [भावे । न०ब० । तच्छून्ये त्रि० ।

**अवारण** न० वृ-णिच्-ल्युट् अभावे न०त० । निषेधा-

**अवारणीय** त्रि० न वारणीयः वारयितुमशक्यः । वारयितुमशक्ये १रिपुप्रभृतौ २रोगादौ च । अवारणीयाश्च रोगाः सुश्रुते दर्शिता यथा "अथातोऽवारणीयमध्यायं व्याख्यास्यामः । उपद्रवैस्तु ये जुष्टा व्याधयो यान्त्यवार्य्यताम् । रसायनाद्विना वत्स ! तान् शृणुष्वैकमना मम ॥ वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः । अश्मरी मूढगर्भश्च तथैवोदरमष्टमम् ॥ अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः ॥ प्राणमांसक्षयश्वासतृष्णाशोषवमिज्वरैः ॥ मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः । वर्ज्जनीया विशेषेण भिषजा सिद्धिमिच्छता ॥ शूलं सुप्तत्वचं भग्नं कम्पाध्मानमनिपीड़ितम् । नरं रुजार्त्तिमन्तञ्च वातव्याधिर्व्विनाशयेत् ॥ यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव वा । पिडकापीड़ितं गाढं प्रमेहो हन्ति मानवम् ॥ प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम् । पञ्चकर्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्॥ तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितम् । शोफातिसारसंयुक्तमर्शोव्याधिर्व्विनाशयेत् ॥ वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च । भगन्दरात् प्रस्रवन्ति यस्य तं परिवर्ज्जयेत् ॥ प्रशूननाभिवृषणं रुद्धमूत्रं रुगन्वितम् ।